द्रोगस्यान्त्यभं चेत्यम्” ज्यो० । [पूर्व्वस्य वा । अपाटवे ।

**आ(अ)कौशल** न० अकुशलस्य भावः अण् । द्विपदवृद्धिः

**आक्रन्द** आ+क्रन्द–घञ् । १सारवे रोदने, २आह्वाने, ३शब्दे, च । कर्मणि घञ् । ४मित्रे, ५भ्रातरि च । आधारे घञ् । ६दारुणे युद्धे, दुःखिनां ७रोदनस्थाने च । आक्रन्दयति अच् । ८पार्ष्णिग्राहपश्चाद्वर्त्तिनि नृपभेदे । अरिशब्दे ३५५ पृष्ठे विवृतिः “आक्रन्दे चाप्यपैहीति न दण्डमनुरब्रवीत्” मनुः पार्ष्णिग्राहञ्च संप्रेक्ष्य तथाक्रन्दञ्च मण्डले” मनुः ।

**आक्रन्दन** न० आ+क्रन्द–ल्युट् । १सारवरोदने २आह्वाने च ।

**आक्रन्दिक** त्रि० आक्रन्दे दुःखिनां रोदनस्थानं धावति ठञ् टक् वा । दुःखिनां रोदनस्थानधावके ठञि स्त्रियां ङीप्

**आक्रन्दिन्** त्रि० आक्रन्दति आ+क्रदि+णिनि । रोदनपूर्व्वकाह्वायके । “परस्पराक्रन्दिनि चक्रवाकयोः” कुमा० ।

**आक्रन्दे** अव्य० आ+क्रन्द–आधारे के । युद्धे निरु० ।

**आक्रम** पु० आ+क्रम–घञ् अवृद्धिः । १बलेनातिक्रमणे । ल्युट् । आक्रमणमप्यत्र न० । आक्रम्यते परलोकोऽनेन करणे घञ् । परलोकप्राप्तिसाधने २विद्याकर्म्मादौ । “अथ यथाक्रमोऽयं परलोके स्थाने भवति तमाक्रममाक्रम्योभयान् पाप्मन आनन्दांश्च पश्यति” वृ०उप । “अयं पुरुषः परलोकस्थाने प्रतिपत्तव्ये निमित्ते यथाक्रमो भवति यादृशेन परलोकप्रतिपत्तिसाधनेन विद्याकर्म्मपूर्व्वप्रज्ञालक्षणेन युक्तोभवति तमाक्रमं परलोकस्थानायोन्मुखीभूतं प्राप्ताङ्कुरीभावमिव वीजं तमाक्रममाक्रम्यावष्टभ्य” भा० ‘अथ केनाक्रमेण यजमानः स्वर्गं लोकमाक्रमते” शत०ब्रा० । ३कृताक्रमणे ४अभिभूते ५व्याप्ते ६आग्रहे च । आक्रामति पराभवति क्षुधाम् आ+क्रम–अच् । ७अन्ने “आक्रमोऽस्याक्रमाय त्वा” यजु० १५,९ । “आक्रमोऽन्नम्” वेददीपः ।

**आक्रान्त** त्रि० आ+क्रम–क्त । १पराभूते २स्वोपरिगत्या व्याप्ते सममेव समाक्रान्तं द्वयं द्विरदगामिना” रघुः । “नितान्तमाक्रान्त इवाङ्गनानाम्” माघः ।

**आक्रान्ति** स्त्री आ–क्रम भावे क्तिन् । आक्रमणे उपरिस्थानेन प्राप्तौ “आक्रान्तिसम्भावितपादपीठम्” कुमा० ।

**आक्रीड** पु० आक्रीड्यत्यत्र आ+क्रीड–घञ् । क्रीड़ास्थाने उद्यानादौ । “आक्रीड़पर्व्वतास्तेन कल्पिताः स्वेषु वेश्मसु” कुमा० “कमप्याक्रीड़मासाद्य तत्र विशिश्रमिषुः” दशकु० । कर्त्तरि अच् । २विहारशीले त्रि० ।

**आक्रीड़िन्** त्रि० आ+क्रीड़-घिणुन् । क्रीड़ाशीले स्त्रियां ङीप्

**आक्रुष्ट** त्रि० आ+क्रुश–क्त । १कृताक्रोशे यं प्रति आक्रोशः कृतस्तस्मिन् । २शब्दिते ३निन्दिते च । “भेरीभिराक्रुष्टमहागुहामुखम्” माघः । भावे क्त । ४परुषभाषणे न० “मार्ज्जारमूषिकास्पर्शे आक्रुष्टे क्रोधसम्भवे” कात्या० “आक्रुष्टे परुषभाषणे” श्रा०त० रघुनन्दनः ।

**आक्रोश** पु० आ+क्रुश–घञ् । १विरुद्धचिन्तने, २शापे ३निन्दायाञ्च ल्युट् आक्रोशनमप्यत्र न० । ४अपवादे “पूर्व्वमासीद्दुराक्रोशं स्तनतस्तस्य भूतले” रामा० ‘कुलाक्रोशकरं लोके धिक् ते चारित्रमीदृशम्” रामा० ।

**आक्रोशक** त्रि० आ+क्रुश-ण्वुल् । आक्रोशकारके ।

**आक्रोष्टृ** त्रि० आ+क्रुश-तृच् । आक्रोशकारके । आक्रुश्यमानोनाक्रोशेन्मन्युरेव तितिक्षतः ॥ आक्रोष्टारं निर्द्दहति सुकृतं चास्य विन्दति” भा०आ०प० ८६ अ० ।

**आक्ली** अव्य० आ+क्लिद–डी । विकारे उर्य्यादि । आक्लीकृत्य ।

**आक्लेद** पु० आ+क्लिद–घञ् । आर्द्रीभावे । [जाते वैरे ।

**आक्षद्यूतिक** न० अक्षद्यूतेन निर्वृत्तम् ठक् । आक्रीड़या

**आक्षपाटिक** पु० अक्षपटे क्रीड़ास्थाने व्यवहारस्थाने वा नियुक्तः ठक् । १अक्षक्रीड़ाध्यक्षे २व्यवहाराध्यक्षे प्राड्विवेके च ।

**आक्षपाद** त्रि० अक्षपादस्येदम् अण् । १गौतमसाम्बन्धिमते । तेन प्रोक्तम् अण् । तत्कृते २शास्त्रे च तच्च शास्त्रं प्रमाणादि षोडशपदार्थतत्त्वावेदकं पञ्चाध्यायात्मकम् । प्रमाणप्रमेयेत्यादि सूत्रमारभ्य हेत्वाभासाश्च यथोक्ताः इत्यन्तसूत्रसमुदात्मकम् । तस्य संक्षिप्तार्थः न्यायशब्दे वक्ष्यते । अक्षपादप्रणीतं वेत्ति अण् । न्यायमताभिज्ञे ३नैयायिके च ।

**आक्षार** पु० आ+क्षर-णिच्-घञ् । अगम्यागमनं कृतं त्वयेति पुरुषं प्रति, अगम्यगमनं त्वया कृतमिति स्त्रियं च प्रति दूषणे । ल्युट् आक्षारणमप्यत्र न० । युच् टाप् । अत्रार्थे स्त्री । [ यापवादस्तेन दूषिते ।

**आक्षारित** त्रि० आ+क्षर-णिच्-क्त । आक्षारोमिथुनविष-

**आक्षिक** त्रि० अक्षेण दीव्यति जयति जितं वेति अक्ष+ठक् । १अक्षेण देवके २अक्षेण जयिनि ३अक्षजिते च । ‘प्रातिभाव्यं वृथादानमाक्षिकं सौरिकं च यत्” मनुः भारभूतानक्षान् हरति वहत्यावहति वा वंशा० अक्षपूर्व्वात् भारात् ठक् । आक्षभारिकः अक्षभारवाहकादौ त्रि० अक्षोऽत्र वंशादिसाहचर्य्यात् कलिद्रुमः ।

**आक्षित्** त्रि० आ+क्षि–क्विप् । “आवर्त्तमाने “आक्षित् पूर्व्वास्वपरा” ऋ० ३,५५,५ । “आक्षित् आवर्त्तमानः” भा० ।